Shodhshauryam, International Scientific Refereed Research Journal
© 2024 SHISRRJ | Volume 7 | Issue 1 | ISSN : 2581- 6306

# अपस्माररोगविचार:

प्रो.प्रभातकुमारमहापात्र:
निदेशक:, केन्द्रीयसंस्कृतविश्वविद्यालय:, एकलव्यपरिसर:, अगरतला, त्रिपुरा

**Article Info**

**Publication Issue :**
January-February-2024
Volume 7, Issue 1
**Page Number :** 221-230
**Article History**
Received : 01 Feb 2023
Published : 20 Feb 2023

**शोधसारांश:**– स्वरूपत: द्वादशभि: भेदै: अपस्मार: भिन्नो भिन्नो द्वादशभेदा: सन्ति। अत: तेषां स्वरूपं निगद्यते यथा – एता: समस्ता: दूत्य: अपस्माररोगमिम् आश्रयन्ति । तथा च एता: स्वनामानुसारमेव रोगचेष्टा: जातकस्य शरीरे उत्पादयन्ति । अर्थात् आभि: दूतिभि: अपस्मार: द्वादशधा कथ्यते। तासां लक्षणं यथा – यदि जातकस्य वारं वारं दीर्घस्वासं चलति तत् श्वसनापस्मार इति कथ्यते। यदि शरीरस्य मुखस्य वा कान्ति: मलिना स्यात्तदा तन्मलिना उच्यते। यदि जातक: वारं वारम् अतिनिद्रायां शेते तत् निद्रापस्मार: इत्युच्यते।

**मुख्यशब्दा: –** रोगमुक्ति:, परिजन:, रोगिण:, रक्तपित्तरोग:, दैवज्ञ:, पापग्रह:।

शरीरंव्याधिमन्दिरमुक्तिरियं तु प्रसिद्धा एव वर्तते। भौतिकेऽस्मिन् प्रपञ्चे प्राय:सर्वे जना: केनचिद्रोगेण ग्रस्ता एव भवन्ति। तथापि कश्चिद्रोग: भवति यथा तस्यरोगस्य प्रभाव: अधिकतर: यदा दृश्यते, तदैव जातक: रोगी इतिसंज्ञां प्राप्नोति। तदा रुग्णस्य परिजन: रोगमुक्ति: कदा भविष्यति, किमुपायंकर्त्तव्यं, असाध्येरोगे सति रोगिण: मृत्यु: भविष्यति न वेति शङ्काधारितान् प्रश्नान् पृच्छति। एतेषांरोगप्रश्नानां सम्यग्विचार्य उत्तरं देयं भवति। तत्रादौ रोगानिर्णय: कर्तव्य:। तद्यथा –

**रक्तपित्तप्रकोपोदिनेशोऽष्टमे भूसुतो वा बुध: सन्निपातस्तदा।**

**कुष्ठरोगोऽमे राहुयुक्तो रवि षष्ठगोवा महाकुष्ठरोगप्रद:।।**

**अष्टमे राहुणा संयुत: सूर्यजोवातरोगेण पादादिकम्पस्तदा।**

**सन्निपात: कविश्चन्द्रयुक्तोऽष्टमेवूर्यहीन: सपापो महारोगकृत्।।** (प्र.भू.रो.जी.अ.श्लो.5-6)

प्रश्नकालेसूर्य: अथवा भौम: यदि अष्टमभावे स्यात्तदा रक्तपित्तरोग: जायते। यदि बुध:अष्टमभावे स्यात्तदा सन्निपातरोग: जायते। राहुणा युक्त: सूर्य: यदि अष्टमभावेस्यात्तदा कुष्ठरोग: भवेत्। राहुणा युक्त: सूर्य: षष्ठभावे स्यात्तदा महाकुष्ठरोग:जायते इति ज्ञातव्य:। यदि प्रश्नकाले राहुग्रहेण युक्त: शनि: अष्टमभावे स्यात्तदावातरोगेण ग्रस्तत्वात् हस्तपादादीनां कम्पनं भवति। चन्द्रग्रहेण युक्त: शुक्र:अष्टमभावे स्यात्तदा सन्निपातरोग: भवति। तथा अष्टमभावे एव स्थित: शुक्र: बलहीन:पापग्रहेण युक्त: स्यात्तदा असाध्यरोगा: जायन्ते। रोगप्रश्ने विचारणीया: भावा: यथा –

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

**सुखागारं रोगी दशमभवनं त्वौषधगृम्**

**रुग्णस्तं वैद्योऽङ्गं सकलमितिविज्ञाय गणकः।**

**बलाक्रान्तौ वैद्यौषधगृहपतौप्रश्नसमये**

**तदा भद्रं विद्यादिह हितद्भावेन कुशलम्।।**(प्र.भू.रो.जी.अ.श्लो.8)

कुण्डल्यांचतुर्थभावः रोगिणः स्थानं, दशमभावः औषधगृहम्, सप्तमःरोगभावः तथा लग्नं वैद्यस्य स्थानमिति विज्ञाय दैवज्ञः फलादेशं कुर्यात्। तत्र चप्रश्नकाले वैद्यौषधगृहपतौ (लग्नेशदशमेशौ) बलयुक्तौ स्यातां तदा रुग्णस्य आरोग्यं (कल्याणं) तथा तयोः बलहीने सति अकुशलं ज्ञातव्यम्।

अथादौरागारम्भावसानकालः निरूप्यते प्रश्नमार्गे यथा –

**लग्नोदितोडुतश्चन्द्रो यावत्युडुनिसंस्थितः।**

**तस्मात्तावति नक्षत्रेरोगारम्भमुदीरयेत्।।**

**यद्वा मान्दिनवांशस्यद्वादशांशर्क्षगे विधौ।**

**मान्दीन्दुयोगगभे वैषुग्राह्यं प्रष्टुरनिष्टभम्।।**

**दूतवाक्याद्यवर्णोक्तराशिगेत्यन्तदोषदे।**

**चन्द्रार्कगुरुमन्देषुरोगारम्भमुदीरयेत्।।** (प्र.मा.त्रयो.अ.श्लो.1-3)

प्रश्नलग्नस्यनक्षत्रात् यावन्नक्षत्रे चन्द्रः स्थितः स्यात्तस्मात्चन्द्रस्थितनक्षत्रात्तावति संख्यकनक्षत्रे रोगारम्भः वदेत्। अत्र प्रहरज्ञानेनरोगारम्भः कथ्यते यत् – सूर्योदयात् 7घटी30पलेषु एकः एकः प्रहरः भवति। एवमहोरात्रेअष्ट8प्रहराः भवन्ति। पूर्वगणनानुसारं यावति संख्यके प्रहरे नक्षत्रस्थितिः तावतिसंख्यके प्रहरे रोगोत्पन्नो भवति। स्पष्टगुलिकनवांशे वा द्वादशांशे नक्षत्रेचन्द्रे गते अथवा स्पष्टगुलिकस्पष्टचन्द्रयोः योगनक्षत्रे अथवा पृच्छकस्यविपत्-प्रत्यरि-वधाद्यनिष्टनक्षत्रेषु रोगारम्भो भवति। प्रश्नकुण्डल्यांगुरुशनिचन्द्रसूर्येषु यः अधिकः पापग्रहः स्यात्तस्य दूतोच्चारितवाक्यस्यप्रथमवर्णराशितः अत्यन्तदोषप्रदायकाष्टमस्थानस्थितराशौ रोगप्रारम्भो भवति।

अत्रदूतकथनेन ज्ञायते यत् – प्रश्नकाले यः रोगी सः दूतः अथवा रोगिणः शुभाशुभं यःपृच्छति सः दूतः यस्यां दिशि सर्वप्रथमं दृश्यते तद्दिशायां पृच्छकस्य रोगारम्भोभवति। पूर्वदिशातः आरभ्य यावत्यां दिशि दूतः अवस्थितः पृच्छति तत्समसंख्ये प्रहरेप्रष्टुर्व्याधिसमुद्भवो भवति। अत्र प्रश्नमार्गे रोगप्रारम्भदिशाज्ञानम् आलोचितंयथा –

**यदाशाभिमुखो रोगीदृश्यते दूत एव वा।**

**रोगारम्भणमेतस्यां दिशि प्रष्टुरुदीर्यताम्।।**

**ऐन्द्रीतो दिशियावत्यां दूतः पृच्छति संस्थितः।**

**यामे तत्समसंख्ये स्यात्प्रष्टुर्व्याधिसमुद्भवः।।**(प्र.मा.त्रयो.अ.श्लो.4-5)

प्रश्नकुण्डल्यांरोगेशः यस्मिन् राशौ भावे वा तिष्ठति तदा तस्य भुक्तभोग्यानुसारं रोगस्यगतगम्यकालज्ञानं अधिकाल्पत्वं वदेत्। अत्र रोगेशः षष्ठेशः अष्टमेशश्च कथ्यते। यदिषष्ठेशः दिवाबलीग्रहः भवेदथवा षष्ठस्थाने दिवाबलीग्रहः तिष्ठेत्तदा दिवसेरोगप्रारम्भो भवति। यदि षष्ठेशः रात्रिबली भवति अथवा षष्ठस्थाने रात्रिबलीग्रहःस्थितः स्यात्तदा रात्रौ रोगप्रकोपः प्रारम्भश्च भवति। यथोक्तम् -

**रोगेशाश्रितराशौतद्भुक्तभौक्तव्यभागतः।**

**रोगस्यगतगन्तव्यकालाधिक्याल्पते वदेत्।।**

**षष्ठाधिपे दिवावीर्ये यद्वा षष्ठगतेग्रहे।**

**दिवारम्भश्च वृद्धिश्चरोगाणामन्यथा निशि।।** (प्र.मा.त्रयो.अ.श्लो.7-8)

आरूढराशितःयावति भवने षष्ठेशः वर्तते तावति संख्यके आग्रिममासे प्रश्नकालात् रोगारम्भो भवति।अथवा आरूढनक्षत्रात् यावति नक्षत्रे षष्ठेशः वर्तते तावति संख्यके अथवा प्रश्नकालेसूर्यस्थितनक्षत्रात् षष्ठेशावस्थितनक्षत्रं यावत् गणयेत् तावति संख्यके मासेरोगारम्भो भवति। चतुर्थेशाश्रितराशौ चन्द्रमागते सति रोगसमाप्तिर्भवति।लग्नलग्नेशचन्द्राः यदा शुभग्रहैः युताविक्षिताः भवेयुस्तदा रोगशमनं भवति।

प्रसङ्गेऽस्मिन्षट्पञ्चाशिकायां पृथुयशसा प्रतिपाद्यते यत् -

**शुभग्रहाःसौम्यनिरीक्षिताश्च विलग्नस प्ताष्टमपञ्चमस्थाः।**

**त्रिषड्दशाये च निशाकरः स्याच्छुभंभवेद्रोगनिपीडितानाम्।।** (ष.पं.शुभा.अ.श्लो.5)

यदिशुभग्रहाः बुध-गुरु-शुक्राः विलग्नसप्तमाष्टमस्थानेषु समवस्थितास्ते च शुभग्रहैरेवदृष्टाश्चेत्, तृतीयषष्ठदशमेकादशस्थानेषुअन्यतमे स्थिते चन्द्रे तदा रोगपीडितानां शुभमारोग्यं ब्रूयात्।

प्रसङ्गेऽस्मिन्रोगिणः शुभाशुभविचारः प्रश्नतन्त्रे ताजिकनीलकण्ठ्यामुक्तम् -

**विलग्नेषष्ठपः पापो जन्मराशिं निरीक्षते।**

**रोगिणस्तस्यमरणं निश्चयेन वदेद्बुधः।।**

**चतुर्थाष्टमगेचन्द्रे पापमध्यगतेऽपि वा।**

**मृतिःस्याद्बलसंयुक्तसौम्यदृष्ट्याऽचिरात्सुखम्।।**

**विधौ लग्नेस्मरे भानौ रोगी याति यमालयम्।**

**प्रश्नेक्रूरग्रहे लग्ने रोगवृद्धिश्चिकित्सकात्।।**

**तथा लग्नगतेसौम्ये वैद्योक्तममृत वचः।**

**लग्नंवैद्यो द्युनं व्याधिः खं रोगी तुर्यमौषधम्।।**

**रोगिणोभिषजो मन्त्री मैत्री भेषजरोगयोः।**

**व्याधेरुपशमोवाच्यः प्रकोपः शात्रवे तयोः।।**

**लग्ननाथे चसबले केन्द्रसंस्थे शुभग्रहे।**

**उच्चगे वात्रिकोणे वा रोगी जीवति निश्चियम्।।**

**एकः शुभोबली लग्ने त्रायते रोगपीडितम्।**

**सौम्याधर्मारिलाभस्थास्तृतीयस्था गदापहाः।।**(ता.नी.प्रश्नतन्त्रेवि.प्र.अ.श्लो.56-62)

यदिषष्ठेशः वा पापग्रहः विलग्ने स्थितः जन्मराशिं पश्येत्तदा पृच्छकेन यस्य रोगिणःप्रश्नः कृतस्तस्य निश्चयेन मरणं वदेत्। प्रश्नकुण्डल्यां चन्द्रे चतुर्थाष्टमगेअपि वा पापमध्यगते सति मृतिः स्यात्। तत्र बलयुक्तशुभग्रहदृष्ट्या दृष्टे सतिअचिरात् सुखं स्यात्। प्रश्नकुण्डल्यां चन्द्रे लग्ने स्थिते सति, सूर्येसप्तमे सति (अर्थात् पूर्णिमायां सन्ध्यायां यदि प्रश्नं करोति पृच्छकः) तदा रोगीयमगृहं याति। प्रश्ने पापग्रहे लग्ने सति चिकित्सकात् रोगवृद्धिः भवति। तथाशुभग्रहे लग्नगते सति वैद्योक्तममृतवचनं भवति। अत्र लग्नराशिशीलः चिकित्सकः, सप्तमं रोगः, दशमस्थानंरोगी, चतुर्थस्थानमौषधंभवति। यदि दशमेशस्य लग्नेशस्य भिषजरोगिणयोः मैत्री वा भेषजरोगयोः मैत्री स्यात्तदारोगस्य उपशमः स्यात्। तयोः लग्नेशदशमेशयोः शत्रुभावे सति व्याधेः प्रकोपः वाच्यः।बलयुक्ते लग्नेशे शुभग्रहे केन्द्रसंस्थे च सति वा स्वोच्चराशिगते वा मूलत्रिकोणे, सिंहवृषाजप्रमदाकार्मुकभृत्तौलिकुम्भधराःइति परिभाषिते त्रिकोणे सति रोगी निश्चयं जीवति। बली एकः शुभग्रहः लग्ने स्थितःतदा रोगपीडितं रक्षति। शुभग्रहाः धर्मारिलाभतृतीयस्थाः रोगशान्तिकरा भवन्ति।रोगप्रश्ने रोगिणः मरणयोगः प्रश्नभूषणे कथ्यते यथा -

**प्रश्नलग्नोपगंपापभं रोगिणः पापयुक्तेक्षितं चाष्टमर्क्ष यदा।**

**पापयोरन्तरेपापयुक्तोऽष्टमे चन्द्रमा मृत्ययोगो भवेत्सत्वरम्।।**

**प्रश्नलग्नक्षणेपापखेटा व्यये नैधने चन्द्रमा वा नगे लग्नभे।**

**नैधनेशत्रुभे सत्वरं रोगिणो मृत्युोगस्तदा व्यत्यये व्यत्ययः।।** (प्र.भू.रो.जी.अ.श्लो.1-2)

प्रश्नकुण्डल्यांयदि लग्ने पापग्रहस्य राशि: भवेत्, अष्टमभाव: पापग्रहेण युक्त: दृष्टो वाभवेत्तथा अष्टम एव भावे पापग्रहेण युक्त: चन्द्र: स्यात् तदा रूग्णस्य शीघ्रमेवमृत्य: ज्ञातव्यम्। तदनन्तरं श्लके त्रयो योगा: निरूपिता: वर्तन्ते –

1.प्रश्नकाले यदि पापग्रहा: लग्नात् द्वादशभावे स्यु चन्द्रश्च अष्टमे भावे स्थित:स्यात् तदा रोगिण: शीघ्रमेव मृत्यु: ज्ञातव्यम्।

2.प्रश्नकाले पापग्रहा: सप्तमे भावे स्यु: तथा चन्द्रमा लग्ने स्यात्तदा रोगिण:शीघ्रं मृतु: भवेत्।

3.पापग्रहा: अष्टमे स्यु: चन्द्रश्च षष्ठे भावे स्यात्तदा रोगिण: मृत्यु: भवेत्।

पुनरपिरोगिण: मरणयोग: प्रश्नभूषणे कथ्यते यथा –

**चन्द्रे लग्ने कलत्रेऽर्के शीघ्रंरोगी विनश्यति।**

**कौर्प्यशे मेषभे भौमेचन्द्रयुक्ते च नश्यति।।** (प्र.भू.रो.जी.अ.श्लो.3)

प्रश्नकालेयदि प्रथमावे चन्द्र: स्यात् सप्तमे भावे च सूर्य: स्यात्तदा अभिष्टरोगी शीघ्रमेवमृत्युं प्राप्नोति। यथा कुण्डल्यां अथवा चन्द्रेणयुक्त: भौम: लग्नचक्रे मेषराशौतथा नवांशचक्रे मेषराशौ भवेत्तदापि रोगी शीघ्रं मृत्युं प्राप्नोति। प्रश्नकालेलग्नेश: यदि वृश्चिकराशे: प्रथमद्रेष्काणे स्यात्तदा अभीष्टरोगिण: निश्चयेनमृत्यु: दैवज्ञ: विजानीयात्।

मृत्युतुल्यकष्टयोग:प्रश्नभूषणे कथ्यते यथा –

**प्रश्नलग्नाद्यदा सप्तमे सद्यतेरोगिण: भद्रमुक्तं न पापग्रहै:।**

**मिश्रखैटैर्विमिश्रं फलं सूरिभिस्तत्रलग्नेश्वरे पापयुक्ते मृति:।।** (प्र.भू.रो.जी.अ.श्लो.4)

**लग्नपो दुर्बलो मृत्युनाथो बलीशत्रुभे नैधने शीतभानौ मृति:।**

**लग्नपश्चोदितो मृत्युपोदुर्बलो लाभपो वीर्ययुक्तश्चिरञ्जीवनम्।।** (प्र.भू.रो.जी.अ.श्लो.7)

रोगिसम्बन्धिप्रश्नकालेप्रश्नलग्नात् सप्तमे भावे शुभग्रहे सति रोगिजनस्य स्वास्थ्यलाभं कल्याणञ्चज्ञातव्यम्। परन्तु सप्तमे पापग्रहेण युक्ते कल्याणं न भवति अर्थात्मृत्युपर्यन्तं रोग: चलति। तथैव शुभपापमिश्रितै: ग्रहै: सप्तमभावे सतिमृत्युतुल्यं कष्टं भवति। प्रश्नकाले लग्नेशे पापग्रहेण युक्तेऽपि कष्टंज्ञातव्यम्।

प्रश्नकालेलग्नेश: बलहीन: तथा अष्टमेश: बलयुक्त: स्यात्तदा चन्द्र: षष्ठे अथवा अष्टमे भावेभवेत्तर्हि रोगिण: मृत्यु: भवति। यदि लग्नेश: उदित: स्यात् (अस्तं न गत: स्यात्)रोगी दीर्घायु: भवति।

**लग्नाष्टमपती लग्ने स्थितावेकत्ररोगिणाम्।**

**दृक्काणे मरणं नस्यादित्युक्तं पूर्वसूरिभि:।।**

**तावेव निधने स्यातामेकद्रेष्काणगौयदि।**

**तदामृत्युर्भवेदेवरोगिणो नात्र संशयः।।**(प्र.भू.अ16.श्लो.2-3)

प्रश्नकालेयदि लग्नेशाष्टमेशौ प्रथमभावे स्थितौ तथा एकस्मिन्नेव द्रेष्कणे स्थितौ भवेतां तदारुग्णस्य मृत्युः न स्यादिति प्राचीविद्वद्भिः उक्तम्। प्रश्नकाले तौ एवलग्नाष्टमेशौ अष्टमभावे स्थित्वा अष्टमभावस्य एकस्मिन्नेव द्रेष्काणे गतौ स्यातांतदा रोगिजनस्य मृत्युः भवति। अस्मिन् विषये संशयः नास्ति।

रोगाद्युत्पत्तिर्नवेति प्रश्ने प्रश्नवैष्णवे कथ्यते यत् -

**क्रूरे विलग्ने न गुणास्तुवैद्यात् न चौषधे रोगमुपैति वृद्धिम्।**

**सौम्यग्रहैः लग्नगतैःबलाढ्यैः वैद्यौषधाभ्यां गदवान् सुखी स्यात्।।**

**पापैः स्मरस्थैर्भिषगौषधाभ्यांरोगात्कुरोगी भवति ह्यतीव।**

**सौम्यैः मदस्थैःभिषगौषधैस्तु सुपथ्यसेवी गदवान् सुखी स्यात्।।**

**पापैः नभस्थैः गदवान्स्वबुद्ध्याकुपथ्यभक्षाद् गदमेति वृद्धिम्।**

**सौम्यैः ग्रहैःकर्मगतैः सुपथ्यात् वैद्यौषिधीभिः सुखमेति रोगी।।** (प्र.वै.न.अ.श्लो.7-9)

यदाकश्चित्पृच्छकः दैवज्ञं पृच्छति यत् मम भ्रता स्वस्थो भविष्यति न वेति तदा यदिलग्ने क्रूरग्रहाः भवेयुस्तदा वैद्येन औषधिसेवनेन च रोगी रोगमुक्तिर्न भवति। यदिलग्ने बलवान् शुभग्रहाः स्थिताः स्युस्तदा वैद्यौषधोपचारेण रोगीरोगाद्विमुक्तिर्भवति। यदि सप्तमभावे पापग्रहाः अवस्थिताः तदा वैद्यौषधिना रोगशमनंन भवति रोगः एधते च। यदि सप्तमभावे शुभग्रहाः स्थिताः दृष्टाश्च स्युस्तदापथ्यपालनेन वैद्यौषधिसेवनेन च रोगी शीघ्रं रोगात्शमनं प्राप्नोति। यदि दशमभावःक्रूरग्रहैः युतः दृष्टश्च स्यात्तदा रोगाक्रान्तजनः स्वकुबुद्ध्या अपथ्यपालनेनरोगं वर्द्धयति। परन्तु यदि दशमभावः शुभग्रहैः युतः दृष्टश्च स्यात्तदावैद्य-औषधि-सुपथ्यैः रोगी सुखं प्राप्नोति। पुनरपि रोगनाशकयोगाः कथिताः यथा -

**सौम्यग्रहेणाथ विलग्नपेनयदीत्थशालङ्कुरुते शशाङ्कः।**

**केन्द्रस्थितःसौम्ययुतेक्षितः स्यात् निहन्ति रोगं सुखमाशु कुर्यात्।।**

**केन्द्रे शशाङ्केऽथ विलग्ननाथेसौम्यैर्ग्रहैर्दृष्टयुतेन पापैः।**

**वक्रास्तरन्ध्रेशदिनेशवर्ज्यो हन्यादाङ्गदयुते सुखमाशु कुर्यात्।।**

**चरोदये वा द्वितनूदयेवा शीतांशुलग्ने शुभवीक्षिते वा।**

**स्वराशिसंस्थे गगनेऽथ चन्द्रेबन्धुस्थितो वापि गदक्षयः स्यात्।।** (प्र.वै.न.अ.श्लो.10-12)

यदिकेन्द्रे अवस्थित: चन्द्र: इत्थशालयोगेनान्वित: लग्नेशेन शुभग्रहेण च युत:दृष्टश्च स्यात्तदा शीघ्रं रागनाशं याति रोगी सुखं प्राप्नोति। यदि केन्द्रेस्थितौ चन्द्रलग्नेशौ शुभग्रहै: युतौ दृष्टौ च तथा पापप्रभावेन रहितौ भवेताम्, एवंसूर्यरहित: अष्टमेश: अस्तंगत: वक्री च भवति चेत्तदा रोगशमनं याति रोगी शीघ्रं सुखंप्राप्नोति। यदि चरराशौ द्विस्वभावराशौ वा लग्ने तथा चन्द्रलग्नेशौ शुभग्रहै: युत:दृष्टश्चेत्तदा शीघ्रं रोगस्य शमनं भवति। एवं यदि चन्द्रे स्वराशौ दशमे वा चतुर्थेस्थिते सति रोगनाशं भवति।

रोगप्रश्नेप्रश्नवैष्णवे मृत्युविचार: प्रतिपाद्यते यथा –

**वक्रे ग्रहे तत्र पुनर्विकारंसौम्येन पथ्याच्छमितं च रोगात्।**

**लग्ने स्थिते छिद्रपतौ शशाङ्क:लग्नेशयोश्छिद्रगयोर्मृति: स्यात्।।**

**लग्नेशरन्ध्राधिपतीत्थशाले पापेक्षितेरोगयुतस्य मृत्यु:।**

**छिद्रेश्वरेकेन्द्रगतेऽष्टमस्थे लग्नेश्वरे मृत्युमुपैति रोगी।।**

**तुर्यादधस्तात् च विलग्ननाथ: षष्ठेविधुर्द्यूनपतीत्थशालग:।**

**द्यूनेश्वर: षष्ठगतो यदा स्यात् तदाध्रुवं रोगयुजो मृतिर्भवेत्।।** (प्र.वै.न.अ.श्लो.13-15)

यदिलग्ने वक्रीग्रहे स्थिते सति रोगे पुनर्विकारं जायते। परन्तु तत्र यदि कश्चिदेक:शुभग्रह: स्यात्तदा पथ्यपालनेन पुन: रोगशान्तिर्भवति। यदि लग्ने अष्टमेश: स्थितेतथा चन्द्रलग्नेशौ अष्टमभावे भवेतां चेत्तदा रोगिण: मृत्युर्भय: जायते। यदिलग्नेशाष्टमेशयो: इत्थशालयोग: स्यात्तत्र पापग्रहाणां दृष्टिर्भवेत्तदा रोगिण:प्राणसंकटापन्नो भवति। यदि अष्टमेश: केन्द्रे तथा लग्नेश: अष्टमे स्थित: भवेत्तदाअनिष्टकारको भवति। यदि लग्नेश: चतुर्थभावादध: तिष्ठति चन्द्रात् सप्तमेश:इत्थशालयोगान्वित: अथवा सप्तमेश: षष्ठे स्थित: स्यात्तदा रोगिण: कृते अनिष्टकारकोभवति।

पुनरपिस्वास्थ्यप्रदयोग: कथित: –

**पूर्णो शशाङ्कोऽथ बुधे विलग्नेकेन्द्रस्थयोर्भार्गवजीवयोश्च।**

**पापेषुकेन्द्राष्टमवर्जितेषु प्राप्नोति सौख्यं गदवांश्च शीघ्रम्।।** (प्र.वै.नव.अ.श्लो.20)

यदिपूर्णचन्द्रबुधौ लग्ने स्थितौ तथा गुरुशुक्रौ केन्द्रे अवस्थितौ एवंकेन्द्राष्टमभावा: पापग्रहरहिता: स्युस्तदा रोगी शीघ्रं सौख्यं प्राप्नोति।अनन्तरं देवदोषज्ञाने नराणां रोगे सति बाधिदिषु प्रश्ने लक्षणं प्रतिपाद्यते यथा –

**प्रेतश्च राहौ पितर: सुरेज्येचन्द्रे च देव्यास्तपने च देवी।**

**स्वगोत्रदेव्या:क्षितिजे शनौ च बुधे च भूतव्ययरन्ध्रसंस्था:।।**

**शाकिन्य आरेभृगुजेऽम्बुदेव्यो गृह्णन्ति मर्त्यं विमुखं मुकुन्दात्।**

**स्वक्र्षोच्चगे वीर्ययुते च साध्या:चन्द्रे च नीचेऽप्यबले च साध्या:।।**

(प्र.वै.नव.अ.श्लो.21-22)

पञ्चमाष्टमद्वादशभावेषुस्थितग्रहात् देवदोषज्ञापकचक्रम् -

| सूर्य: | चन्द्र: | मङ्गल: | बुध: | गुरु: | शुक्र: | शनि: | राहु: | केतु: | ग्रहा: |
|---|---|---|---|---|---|---|---|---|---|
| देवी | देवी | स्वगोत्रदेवी | स्वगोत्रदेवी | पितर: | जलदेवी | स्वगोत्रदेवी | प्रेत: | सर्प: | |
| | | | शाकिनी | ब्रह्मदोषात् | | डाकिनी | सर्प: | प्रेत: | दोष: |

यदि एते ग्रहा: स्वराशौ अथवा स्वोच्चराशौ स्थिता:, चन्द्र:नीचराशिस्थ: भवेत्तदा देवा: साध्या: भवन्ति। केन्द्रस्थै: बलिभि: पापै: देवा:ग्रहाश्च असाध्या: भवन्ति। केन्द्रस्थै: शुभग्रहै: मन्त्रपूजनादिभि: ग्रहा:देवाश्च साध्या: भवन्ति।

जन्माङ्गचक्रे प्रश्ने च रोगविचाराय केषाञ्चन भावानां ग्रहाणां च शुभाशुभस्थिति: द्रष्टव्या भवति । तद्यथा - लग्नेश:, षष्ठेश:, भौम:, शनि:, चन्द्र:, चन्द्रात् षष्ठेश:, भौमात् षष्ठेश:, शनित: षष्ठेशश्च। कथ्यते जातकालंकारग्रन्थे यथा -

**प्रालेयांशौ रिपुस्थे खलखगसहिते मानवो रोगवान् स्यात् ।**

**क्रूरैर्निष्पीडितश्चेत्तनुसदनगत: शीतरश्मिस्तदानीम् ।**

**क्रूरे केन्द्रालयस्थे यदि शुभविहगैर्नेक्षिते रोगवान् स्यात्,**

**तस्मिन् काव्यालयस्थे कुजगुरुकविभिर्नेक्षिते तद्वदेव ।।** (जा.अ.द्वि.अ.श्लो.सं.21)

अर्थात् पापग्रहयुते चन्द्रे षष्ठस्थे तदा नर: रोगी स्यात्। यदि पापै: पीडित: चन्द्र: लग्नस्थ: स्यात्तदापि जातक: रोगी भवति। यदि पापग्रहे केन्द्रस्थानगते शुभग्रहै: न दृष्टे तदा रोगवान् मनुष्य: स्यात्। तस्मिन् क्रूरे शुक्रराशिगते चन्द्रे मंगलगुरुकविभि: न दृष्टे तदापि नर: रोगी एव भवति ।

तत्रापि मानसिकरोगविचाराय चन्द्रशुक्रराहुकेतुशन्यष्टमेशानां पारस्परिकस्थिति: नूनं द्रष्टव्यो भवति। तद्यथा -

**चन्द्रशुक्राष्टमाधीशा गोचरेतरगा यदि ।**

**विषमाष्ट्युपवासोत्थ उन्दाह इति निर्दिशेत्।।**

**केतुमान्द्यहियुक्तेषु चैतेष्वशुचिभुक्तिज:।**

**सपापे पंचमे भीतिर्वैराग्योत्थ: स भूमिजे ।।**

**क्रोधजोथाऽभिचारोत्थ: षष्ठगेष्वशुभेषु स:।**

**गुर्वादिशापसम्भूत: पापे नवमसंस्थिते ।**

**कल्याणपंचगव्याज्यसेवाद्येषु विधीयताम् ।।** (प्रश्नमार्ग, द्वादशाध्याय:, श्लो.सं.46-49)

मानसिकरोगेषु अपस्माररोग: अन्यतम: । अनेन रोगेण पीडितस्य जातकस्य बुद्धिभ्रमित: भवति येन स: शिथिलशरीरेण अकस्मात् मूर्च्छित: स्यात्। तथा च स: उच्चस्वरमुचार्य्य मुखात् फेनोद्गारं करोति। तस्याङ्ग: चक्षुश्च विकल: व्यावृत: पीतवर्णयुक्तो भवति। तथा तस्य दशनं दशति, मुखाकृति: विकृतो भवति। एवं स्वरूपं यस्य पीडित: जातक:

शारीरिक-मानसिकचेष्टाभिः असामान्यः, असम्बद्धवार्तालापयुक्तः, वाचालश्च भवति। अयं रोगः हिन्द्याम् मृगी इत्युच्यते। यथा प्रश्नमार्गे अपस्माररोगस्य स्वरूपमुच्यते -

**विस्रस्ताङ्गः पतति सहसा भूतले नष्टसंज्ञः**

**फेनोद्गारी रसति परुषं सन्नकायश्चिराय ।**

**व्यावृत्ताक्षो दशति दशनं पीतवर्णः प्रमादी**

**तोयासक्तो विकृतवदनः स्यादपस्मारः एषः ।।** (प्रश्नमार्ग, द्वादशाध्यायः, श्लो.सं.52)

अपस्माररोगस्य सुप्रियाः श्वसनादि द्वादशदूत्यः ख्याताः सन्तीति प्रश्नमार्गे विवेचनं कृतम् यत् -

**श्वसना मलिना निद्रा जृम्भिकानशना तथा ।**

**त्रासिनी मोहिनी चाथ रोदनी क्रोधनी तथा ।।**

**तापनी शोषणी चैव ध्वंसिनी चेति कीर्तिताः ।**

**दूत्यो द्वादश विख्याता अपस्मारस्य सुप्रियाः ।।**

**एताः समस्ता व्यस्ता वा संश्रयन्ति नरं किल ।**

**स्वाख्यानार्थवतीं चेष्टां तत्राभिव्यञ्जयन्ति च ।।**(प्रश्नमार्ग, द्वादशाध्यायः, श्लो.सं.53, 54, 55)

स्वरूपतः द्वादशभिः भेदैः अपस्मारः भिन्नो भिन्नो द्वादशभेदाः सन्ति। अतः तेषां स्वरूपं निगद्यते यथा - एताः समस्ताः दूत्यः अपस्माररोगमिम् आश्रयन्ति । तथा च एताः स्वनामानुसारमेव रोगचेष्टाः जातकस्य शरीरे उत्पादयन्ति । अर्थात् आभिः दूतिभिः अपस्मारः द्वादशधा कथ्यते। तासां लक्षणं यथा - यदि जातकस्य वारं वारं दीर्घस्वासं चलति तत् श्वसनापस्मार इति कथ्यते। यदि शरीरस्य मुखस्य वा कान्तिः मलिना स्यात्तदा तन्मलिना उच्यते। यदि जातकः वारं वारम् अतिनिद्रायां शेते तत् निद्रापस्मारः इत्युच्यते। (जृम्भिका - )। यदि जातकः कारणेन विना भोजनत्यागं करोति तदा अनशनापस्मारः जायते । यदि जातकः कस्मात् कारणात् भयभीतः स्यात्तदा त्रासिनी नामकपस्मारः जायते। यदि नरः वारं वारं मूर्च्छितः स्यात्तदा मोहिनी नामकपस्मारः जायते। यदि जातकः अनायशेन अधिकरोदनं करोति तर्हि रोदिनी नामकपस्मारो जायते। यदि जातकस्य मुखादिसम्पूर्णशरीरः अकस्मात् शुष्कः पीतवर्णश्च स्यात्तदा शोषिणी अपस्मारो जायते। यदि जातकस्य शरीरः अकस्मात् विकलः व्यावृतः भवेत्तदा ध्वंसिनी नामकपस्मारो भवति।

प्रश्नशास्त्रदृष्ट्या अस्यापस्माररोगस्य योगः कथ्यते यत् -

**मन्दे रन्ध्रगतेऽहौ च त्रिकोणे बलिनो शुभाः ।**

**योगोऽपस्मारदो भानुर्भौमश्च गददौ यदि ।।**(प्रश्नमार्ग, द्वादशाध्यायः, श्लो.सं.50)

अर्थात् यदि जन्मकुण्डल्यां अष्टमभावे शनिः, त्रिकोणे च राहुः स्यात्तथा शुभग्रहाः बलयुक्ताः स्युः । परन्तु पापफलप्रदौ सूर्यभौमौ अशुभस्थानस्थौ (त्रिकगतौ त्रिषडायगतौ वा) भवेतां तदा जातकः अपस्माररोगेण पीडितो भवति।

श्रीवैद्यनाथेन विरचिते जातकपारिजातग्रन्थे अपि शरीरवैकल्यं शोषणञ्च कथ्यते यत् -

**जीवे समन्दे दशमेऽर्धचन्द्रे वैकल्यमङ्गे क्षितिजे कलत्रे ।**

**दिनेशचन्द्रौ रविराशियुक्तौ चन्द्रर्क्षगौ वा यदि शोषणं स्यात् ।।**

(जा.पा.जात.भङ्ग.अ.श्लो.सं.78)

अर्थात् जन्मकुण्डल्यां यत्र तत्र शनियुक्ते गुरौ, अर्धचन्द्रे दशमभावगते, भौमे सप्तमभावगते च जातस्याङ्गे वैकल्यं दौर्बल्यं भवति । अत्र अर्धचन्द्रः कथनेन ज्ञायते यत् – सूर्यादुभयत्र त्रिराशिमितान्तरे विद्यमानश्चन्द्रः अर्धो भवति तथा सार्द्धसप्तम्यां तिथौ भवति। यदि सूर्यचन्द्रौ सिंहराशिगतौ वा कर्कराशिगतौ भवेतां तदा जातस्य शरीरे शोषणं भवति।

अस्य अपस्माररोगस्य शान्तेः उपायरपि प्रतिपाद्यते प्रश्नमार्गे यथा –

**शमायादावपसम्मारे कूष्माण्डीबलिमाहरेत्।**

**सुदर्शनेन जुहुयात्तिलैः क्रोधाग्निनाथवा ।।**

**प्रत्यक्षरसहस्रेण घोरापस्मारशान्तये ।।**(प्रश्नमार्ग, द्वादशाध्यायः, श्लो.सं.56, 57)

अर्थात् सर्वादौ अपस्मारशमनाय मन्त्रशास्त्रे प्रतिपादितं कूष्माण्डीबलिकर्म सम्पादयेत्। तथा च सुदर्शनेन क्रोधाग्निना वा मन्त्रशास्त्रेण लिखितस्य प्रसिद्धमन्त्रस्य अक्षरसंख्या सहस्रेण संगुण्य यत्मानं तावत्संख्याहुतिः तिलैः जुहुयात् ।

पुनरपि अस्यापस्मारस्य सामान्यचिकित्सापि प्रतिपाद्यते यथा –

**सिन्धूत्थवृश्चिकालीकुष्ठकणाभार्ङ्गिभिः कृतं चूर्णम् ।**

**नसि योजयेत्तु शस्तं तीव्रापस्मारशान्तये पुंसाम् ।।**

**ब्राह्मीरसे घृतवचामयशंखपुष्पधात्रीसमुद्भवरसे मधुकान्वितं च।**

**सिद्धार्थहिंगुसहिते वृक्षबस्तमूत्रे पानादिना हरति सर्पिरपस्मृतिं तत् ।।**

**त्रिवृद्विलङ्गत्रिफलाग्निविश्वव्याघातसिन्धूत्थकणैर्यथावत् ।**

**ब्रह्मीरसे सर्पिरिदं प्रशस्तं पुंसामपस्मारविनाशनाय ।।**

**मंजिष्टाग्निविलङ्गकुष्ठरनीमुस्तात्रिवृच्छारिबा-**

**दार्वीतिक्तकशंखपुष्पसहितैरेलावचायष्टिभिः ।**

**पाठामागधिसंयुतं घृतमिदं गव्येषु सिद्धं नृणां**

**तीव्रापस्मृतिदोषविस्मृतिहरं कुष्ठापहं कान्तिदम्।।**(प्रश्नमार्ग, द्वादशाध्यायः, श्लो.सं.59- 62)

**सन्दर्भग्रन्थाः –**


1) श्रीगणेदैवज्ञविरचितः जातकालङ्कारः, व्याख्याकारः श्री सुराजशर्मा, हंसाप्रकाशन, जयपुर सं.2011
2) श्रीदैवज्ञवैद्यनाथविरचितः जातकपारिजातः, व्याख्याकारः श्रीकपिलेश्वरशास्त्री, चौखम्भा संस्कृत संस्थान, वाराणसी, सं.-वि.सं.2057
3) प्रश्नमार्गः, व्याख्याकारः डॉ.सुरकान्तझा, चौखम्बा संस्कृत सीरीज आफिस, वाराणसी, सं.-वि.सं.2066
4) प्रश्नवैष्णशास्त्रम्,श्रीसिद्धनारायणदासः,खेमराजश्राकृष्णदास श्रीवेंकटेश्वर बम्वई प्रकाशन-1987
5) प्रश्नभूषणम्,दैवज्ञश्रीजीवनाथः,चौखम्भासंस्कृत संस्थान,वाराणसा, संस्करणन्-1999
6) प्रश्नशिरोमणि,पण्डितरुद्रमणिविरचितः,खेमराजश्राकृष्णदास श्रीवेंकटेश्वर बम्वई, संस्करणम्-2005
7) षट्पञ्चाशिका,दैवज्ञपृथुयशो , बी.के.पब्लिकेशन प्रा.लिमिटेड,भुवनेश्वर, संस्करणम्-2012
8) चिकित्साज्योतिषम्, डा.भास्करशर्मा,जगदीशसंस्कृत पुस्तकालय,जयपुर, संस्करणम् - 2012
9) ताजिकनीलकण्ठी, डा रामचन्द्रपाठकः,चौखम्वासंस्कृत भवन,वाराणासी, संस्करणम्-वि.सं.-2062